# ॥ वकारादि श्रीवराहाष्टोत्तरशतनामावलिः ॥

.. vakArAdi shrI
varAhAShTottarashatanAmAvaliH ..

sanskritdocuments.org

September 11, 2017

# .. vakArAdi shrI varAhAShTottarashatanAmAvaliH ..

# ॥ वकारादि श्रीवराहाष्टोत्तरशतनामावलिः ॥

## Sanskrit Document Information

Text title : vakArAdi varAhAShTottarashatanAmAvaliH

File name : vakArAdivarAha108nAmAvaliH.itx

Category : aShTottarashatanAmAvalI, vishhnu, dashAvatAra, paNDita-bellaMkoNDa-rAmarAya-kavIndra

Location : doc_vishhnu

Author : paNDita shrI bellaMkoNDa rAmarAya kavIndra

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : shrI dashAvatArAShTottara shatanAmAvaliH savyAkhyA

Latest update : January 24, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

September 11, 2017

*sanskritdocuments.org*

श्री हयग्रीवाय नमः ।

हरिः ॐ

ॐ वराहाय नमः ।
ॐ वरदाय नमः ।
ॐ वन्द्याय नमः ।
ॐ वरेण्याय नमः ।
ॐ वसुदेवजाय नमः ।
ॐ वषट्काराय नमः ।
ॐ वसुनिधये नमः ।
ॐ वसुधोद्धरणाय नमः ।
ॐ वसवे नमः ।
ॐ वसुदेवाय नमः । १०
ॐ वसुमतीदंष्ट्राय नमः ।
ॐ वसुमतीप्रियाय नमः ।
ॐ वनधिस्तोमरोमान्धवे नमः ।
ॐ वज्ररोम्णे नमः ।
ॐ वदावदाय नमः ।
ॐ वलक्षाङ्गाय नमः ।
ॐ वश्यविश्वाय नमः ।
ॐ वसुधाधरसन्निभाय नमः ।
ॐ वनजोदरदुर्वारविषादध्वंसनोदयाय नमः ।
ॐ वल्गत्सटाजातवातधूतजीमूतसंहतये नमः । २०
ॐ वज्रदंष्ट्राग्रविच्छिन्नहिरण्याक्षधराधराय नमः ।
ॐ वशिष्ठाद्यर्षिनिकरस्तूयमानाय नमः ।
ॐ वनायनाय नमः ।
ॐ वनजासनरुद्रेन्द्रप्रसादित महाशयाय नमः ।
ॐ वरदानविनिर्धूतब्रह्मब्राह्मणसंशयाय नमः ।
ॐ वल्लभाय नमः ।
ॐ वसुधाहारिरक्षोबलनिषूदनाय नमः ।
ॐ वज्रसारखुराघातदलिताब्धिरसाहिपाय नमः ।
ॐ वलद्वालोत्कटाटोपध्वस्तब्रह्माण्डकर्पराय नमः ।

ॐ वदनान्तर्गतायातब्रह्माण्डश्वासपद्धतये नमः । ३०
ॐ वर्चस्विने नमः ।
ॐ वरदंष्ट्राग्रसमुन्मीलितदिक्तटाय नमः ।
ॐ वनजासननासान्तर्हंसवाहावरोहिताय नमः ।
ॐ वनजासनदृक्पद्मविकासाद्भुतभास्कराय नमः ।
ॐ वसुधाभ्रमरारूढदंष्ट्रापद्माग्रकेसराय नमः ।
ॐ वसुधाधूममषिका रम्यदंष्ट्राप्रदीपकाय नमः ।
ॐ वसुधासहस्रपत्रमृणालायित दंष्ट्रिकाय नमः ।
ॐ वसुधेन्दीवराक्रान्तदंष्ट्राचन्द्रकलाञ्चिताय नमः ।
ॐ वसुधाभाजनालम्बदंष्ट्रारजतयष्टिकाय नमः ।
ॐ वसुधाभूधरावेधि दंष्ट्रासूचीकृताद्भुताय नमः । ४०
ॐ वसुधासागराहार्यलोकलोकपधृद्रदाय नमः ।
ॐ वसुधावसुधाहारिरक्षोधृच्छृङ्गयुग्मकाय नमः ।
ॐ वसुधाधस्समालम्बिनालस्तम्भ प्रकम्पनाय नमः ।
ॐ वसुधाच्छत्ररजतदण्डच्छृङ्गमनोहराय नमः ।
ॐ वतंसीकृतमन्दाराय नमः ।
ॐ वलक्षीकृतभूतलाय नमः ।
ॐ वरदीकृतवृत्तान्ताय नमः ।
ॐ वसुधीकृतसागराय नमः ।
ॐ वश्यमायाय नमः ।
ॐ वरगुणक्रियाधाराय नमः ।
ॐ वराभिथाय नमः ।
ॐ वरुणालयवास्तव्यजन्तुविद्राविघुर्घुराय नमः ।
ॐ वरुणालयविच्छेत्रे नमः ।
ॐ वरुणादिदुरासदाय नमः ।
ॐ वनजासनसन्तानावनजात महाकृपाय नमः ।
ॐ वत्सलाय नमः ।
ॐ वह्निवदनाय नमः ।
ॐ वराहवमयाय नमः ।
ॐ वसवे नमः ।
ॐ वनमालिने नमः । ६०

ॐ वन्दिवेद्याय नमः ।
ॐ वयस्थाय नमः ।
ॐ वनजोदराय नमः ।
ॐ वेदत्वचे नमः ।
ॐ वेदविदे नमः ।
ॐ वेदिने नमः ।
ॐ वेदवादिने नमः ।
ॐ वेदवेदाङ्गतत्त्वज्ञाय नमः ।
ॐ वेदमूर्तये नमः ।
ॐ वेदविद्वेद्य विभवाय नमः । ७०
ॐ वेदेशाय नमः ।
ॐ वेदरक्षणाय नमः ।
ॐ वेदान्तसिन्धुसञ्चारिणे नमः ।
ॐ वेददूराय नमः ।
ॐ वेदान्तसिन्धुमध्यस्थाचलोद्धर्त्रे नमः ।
ॐ वितानकृते नमः ।
ॐ वितानेशाय नमः ।
ॐ वितानाङ्गाय नमः ।
ॐ वितानफलदाय नमः ।
ॐ विभवे नमः । ८०
ॐ वितानभावनाय नमः ।
ॐ विश्वभावनाय नमः ।
ॐ विश्वरूपधृते नमः ।
ॐ विश्वदंष्ट्राय नमः ।
ॐ विश्वगर्भाय नमः ।
ॐ विश्वगाय नमः ।
ॐ विश्वसम्मताय नमः ।
ॐ वेदारण्यचराय नमः ।
ॐ वामदेवादिमृगसंवृताय नमः ।
ॐ विश्वातिक्रान्तमहिम्ने नमः । ९०
ॐ वन्यभूपतये नमः ।

ॐ वैकुण्ठकोलाय नमः ।
ॐ विकुण्ठलीलाय नमः ।
ॐ विलयसिन्धुगाय नमः ।
ॐ वक्षःकबलिताजाण्डाय नमः ।
ॐ वेगवते नमः ।
ॐ विश्वपावनाय नमः ।
ॐ विपश्चिदाशयारण्यपुण्यस्फूर्तये नमः ।
ॐ विश्रृङ्खलाय नमः ।
ॐ विश्वद्रोहिक्षयकराय नमः । १००
ॐ विश्वाधिकमहाबलाय नमः ।
ॐ वीर्यसिन्धवे नमः ।
ॐ विवद्बन्धवे नमः ।
ॐ वियत्सिन्धुतरङ्गिताय नमः ।
ॐ व्यादत्तविद्वेषिसत्त्वमुस्ताय नमः ।
ॐ विश्वगुणाम्बुधये नमः ।
ॐ विश्वमङ्गलकान्तारकृत लीलाविहाराय नमः ।
ॐ विश्वमङ्गलदोत्तुङ्गकरुणापाङ्गाय नमः । १०८

॥ इति वकारादि श्री वराहाष्टोत्तरशतनामावलिः पराभव
श्रावणशुद्ध त्रयोदश्यां लिखिता रामेण समर्पिता च
श्रीहयग्रीव चरणार विन्दयोर्विजयतां तराम् ॥

Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

Source Book:
shrI dashAvatArAShTottarashatanAmAvaliH savyAkhyA
language: Telugu
Composed by : paNDita shrI bellaMkoNDa rAmarAya kavIndra

.. vakArAdi shrI varAhAShTottarashatanAmAvaliH ..

Searchable pdf was typeset using generateactualtext feature of XƎLATEX 0.99996

on September 11, 2017

Please send corrections to *sanskrit@cheerful.com*